अपि च ।
पितामह उवाच ।
"माघमासे शुक्लपक्षे सूर्य्यर्चेण युता पुरा ।
एकादशी तथा चैषा भीमेन समुपोषिता ॥
आचर्य्येन्तु व्रतं कृत्वा पितृणामनृणो भवेत् ।
भीमद्वादशीति विख्याता प्राणिनां पुण्यवर्द्धिनी ॥
नचमेव विनाप्येषा ब्रह्महत्यादि नाशयेत् ।
विनिहन्ति महापापं कुनृपो विषयं यथा ।
कुपुत्रस्तु कुलं यद्वत् कुभार्य्या च पतिं यथा ।
अधर्मेण यथा धर्म्मः कुमन्त्री च यथा नृपम् ।
अज्ञानेन यथा ज्ञानं शौचमशौचता यथा ।
अश्रद्धया यथा श्राद्धं सत्यसेवानृतैर्यथा ॥
हिमं यथोष्णमादद्यादनर्थश्चार्थसञ्चयः ।
यथा प्रकीर्त्तनाद्दानं तपो वै विस्मयाद्यथा ॥
अशिक्षया यथा पुत्रो गावो दूरगतेर्यथा ।
क्रोधेन च यथा शान्तं यथा वित्तमवर्द्धनात् ॥
यथा समीहनाज्ज्ञानं पचानाच यतव्रताः ।
तथैव पापनाशाय प्रोक्तेयं द्वादशी शुभा ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
युगपदुपजातानि नहि हन्ति चिपुष्करम् ॥
न चापि नैमिषक्षेत्रं कुरुक्षेत्रं प्रभासकम् ।
कालिन्दी यमुना गङ्गा न रेवा न सरस्वती ॥
न चैव सर्व्वतीर्थानि एकादश्याः समानि च ।
न दानं न जपो होमो न चान्यसुकृतं क्वचित् ॥
एकतः पृथिवीदानमेकतो हरिवासरः ।
ततोऽप्येका महापुण्या इयमेकादशी परा ॥
अस्मिन् वराहवपुषः कृत्वा देहन्तु हाटकम् ।
घटोपरि नवे पात्रे कृत्वा वै ताम्रभाजने ॥
सर्व्वबीजन्तु ते विप्राः सितवस्त्रावगुण्ठिते ।
सहिरण्यप्रदीपाद्यैः कृत्वा पूजां प्रयत्नतः ॥
वराहाय नमः पादौ क्रोड़ाकृति नमः कटिम् ।
नाभिं गम्भीरघोषाय उरःश्रीवत्सधारिणे ॥
बाहुं सहस्रशिरसे ग्रीवां सर्व्वेश्वराय च ।
मुखं सर्व्वात्मने पूज्य ललाटं प्रभवाय च ।
केशाः शतमयूखाय पूज्या देवस्य चक्रिणः ॥
विधिना पूजयित्वा तु कृत्वा जागरणं निशि ।
श्रुत्वा पुराणं देवस्य माहात्म्यप्रतिपादकम् ॥
प्रातर्विप्राय दत्त्वा तु याचकाय शुभाय च ।
कनकक्रोड़सहितं सन्निवेद्य परिच्छदम् ॥
पश्चात्तु पारणं कुर्य्यान्नातिलुप्तः सुहृद्वृतः ।
एवं कृत्वा नरो विप्रा न भूयः स्तनपो भवेत् ॥
उपोष्यैकादशीं पुण्यां मुच्यते वै ऋणत्रयात् ।
मनोऽभिलषितावाप्तिः कृत्वा सर्व्वव्रतादिकम् ॥"
इति गारुड़े एकादशीमाहात्म्ये १२७ अध्यायः ॥ ( भीमस्य राज्ञः अपत्यं अण् स्त्री । भीमराजनन्दिनी दमयन्ती । यथा, महाभारते । ३ । ६४ । ११ ।
"नादिभ्यत् सा नृपसुता भैमी तत्राथ कस्यचित् ।" )

भैरवं, त्रि, (भीरोरिदं चाक्षत् । भीरु + अण् । ) भयानकम् । इत्यमरः । १ । ७ । २० । ( यथा, महाभारते । १ । १६४ । २७ ।
"सव्येन च कटीदेशे गृह्य वाससि पाण्डवः ।
तद्रक्षो द्विगुणं चक्रे रुवन्तं भैरवं रवम् ॥" )
अस्य पर्य्यायाः भयङ्करशब्दे द्रष्टव्याः ॥

भैरवः, पुं, (भीर्भयङ्करो रवो यस्य । इति भीरव । ततः स्वार्थे अण् ।) शङ्करः । इति मेदिनी । वे ४६ ॥ भयानकरसः । इत्यमरटीकायां भरतः ॥ नदविशेषः । इति शब्दरत्नावली ॥ रागभेदः । इति हेमचन्द्रः ॥*॥ अष्टभैरवाणामुत्पत्तिर्यथा,
"दैत्याधिपः समुत्पत्य हरोरसि गदां चिपत् ।
संस्थितस्तु महायोगी सर्व्वाधारः प्रजापतिः ॥
गदापातचतादुभूरि चतुर्धास्टगथापतत् ।
पूर्व्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः ॥
विद्याराजेति विख्यातः पद्ममालाविभूषितः ।
तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः ॥
कामराजेति विख्यातः कृष्णाञ्जनसमप्रभः ।
नागराजेति विख्यातश्चक्रमालाविभूषितः ॥
चतजादुधिराज्जातो भैरवः शूलभूषितः ।
स्वच्छन्दराजेति विख्यात इन्द्रायुधसमप्रभः ॥
भूयिष्ठादुधिराज्जातो भैरवः फलभूषितः ।
ख्यातो लम्बितराजेति शोभाञ्जनसमप्रभः ॥
ततोऽभूद्देवराजेति भैरवः चतजादथ ।
उग्रराजो बभूवाथ चतजाद्भैरवोऽपरः ॥
एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ! ।
विघ्नराजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ॥"
इति वामनपुराणे अन्धकवरप्रदाने भैरवप्रादुर्भावे ६७ अध्यायः ॥ * ॥
शारदीयदुर्गापूजायां अष्टौ पूज्यभैरवा यथा,
"आदौ महाभैरवञ्च संहारभैरवं तथा ।
असिताङ्गभैरवञ्च रुरुं भैरवमेव च ॥
ततः कालं भैरवञ्च क्रोधभैरवमेव च ।
ताम्रचूड़ं चन्द्रचूड़ं अन्ते च भैरवद्वयम् ॥
एतान् संपूज्य मध्ये च नवशक्तीश्च पूजयेत् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे दुर्गोपाख्याने ६१ अध्यायः ॥
ताम्रचूड़चन्द्रचूड़योः स्थाने कपालभैरवरुद्रभैरवौ ज्ञेयौ । इति तत्रैव गणपतिखण्डे ४१ अध्यायः ॥*॥ अपि च ।
"असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥"
इति तन्त्रसारः ॥*॥
शिवगणाधिपभैरवो यथा,—
"नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा ।
चत्वं भूत्वा महेशस्य शीतभीतास्तपोधनाः ॥
यैर्मांसुषशरीरैश्च प्रापिरे तपसो बलात् ।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम् ॥"
इति कालिकापुराणे ४४ अध्यायः ॥*॥
करवीरपुरराजचन्द्रशेखरपत्नीताराखतीगर्भे महादेवाज्जातपुत्रः । स च पुरा भृङ्गी बभूव पार्व्वतीशापात् वानरमुखो भूत्वा भैरव इति नाम्ना ख्यातः । यथा,—
"प्रविवेश ततो देवी स्वयं ताराखतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्नृपशार्दूल ! तथा शाखामृगाननम् ॥
ततस्तयोर्नाम चक्रे नारदो वचनान्नृप ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः ।
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ॥"
इति कालिकापुराणे ४८ अध्यायः ॥*॥
अपि च ।
"योऽसौ भृङ्गी हरसुतो महाकालोऽपि भर्गजः ।
तावेव गौरीशापेन सम्भूय नरयोनिजौ ॥
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ।
यथा भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु ।
योऽसौ महाभैरवाख्यः सकायः शरभो हरः ।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ॥"
इति कालिकापुराणे ४५ अध्यायः ॥*॥
दुर्जयाख्यगिरिस्थभैरवो यथा,—
"तन्मध्ये भैरवो देवो भर्गसङ्गमसम्भवः ।
दुर्जयाख्ये वरगिरौ स्वर्गस्योपमभूमिगः ॥
योऽसौ शरभरूपस्य मध्यखण्डादिभैरवः ।
स एव भैरवाख्योऽयं पञ्चवक्त्रस्य मस्तके ।
संपूज्य तत्र मतिमान् स याति शिवलोकताम् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥*॥
भैरवस्य मन्त्रो यथा,—
"केवलः सपरो हादिः षष्ठस्वरसमन्वितः ।
चन्द्रबिन्दुसमायुक्तं हयग्रीवस्य बीजकम् ॥
भैरवं पाण्डुनाथन्तु मनमालिङ्गरूपिणम् ।
वाराहेण तु बीजेन पूजयेत्तु विधानतः ॥
सपरौ शावनुस्वारविसर्गाभ्यां समन्वितौ ।
महाभैरवमन्त्रोऽयं भैरवं तेन पूजयेत् ॥"
इति कालिकापुराणे ६२ अध्यायः ॥*॥
अस्य ध्यानं यथा,—
"भैरवः पाण्डुनाथश्च रक्तगौरश्चतुर्भुजः ।
गदां पद्मञ्च शक्तिञ्च चक्रञ्चापि करेण च ।
विभ्रद्देव्याः पुरोभागे पूज्योऽयं विष्णुरूपधृक् ॥"
इति तत्रैव ६० अध्यायः ॥*॥
अस्य गायत्री यथा,—
"महाभैरव विद्महे कैलिरूपाय धीमहि ।
तन्नः कामो भैरवस्तु देवी नित्यं प्रचोदयात् ॥
एषा भैरवरूपस्य गायत्री मे प्रतिष्ठिता ।
यथेष्टमांसमद्यादिभोजनाय मया धृतः ॥
महाभैरवरूपोऽयं तथा कौरतिसङ्गमे ।
अयन्तु वाम्यभावेन पूज्यो मद्यादिभिः सदा ॥"
इति कालिकापुराणे ७७ अध्यायः ॥
अथ महाविद्यादीनां भैरवनिरूपणं यथा,—
शिव उवाच ।
"शृणु चार्व्वङ्गि शुभगे ! कालिकायाश्च भैरवम् ।
महाकालं दक्षिणाया दक्षभागे प्रपूजयेत् ॥
महाकालेन वै सार्द्धं दक्षिणा रमते सदा ।
ताराया दक्षिणे भागे अक्षोभ्यं परिपूजयेत् ॥
समुद्रमथने देवि ! कालकूटं समुत्थितम् ।
सर्व्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः ॥
क्षोभादिरहितं यस्मात् पीतं हालाहलं विषम्
अतएव महेशानि ! अक्षोभ्यः परिकीर्त्तितः ॥